(641) " टकि बन्धने " (X-चुरादिः-1639. सक. सेट्. उभ.)

टङ्ककः-ङ्किका, टिटङ्कयिषकः-षिका, [1]टङ्ककः-ङ्किका, टिटङ्किषकः-षिका, टाटङ्ककः-ङ्किका ; [2]विटङ्कः,[A] [3]टङ्कः, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचम्पयतिवत् (499) ज्ञेयानि ।

(642) " टल वैक्लब्ये " (I-भ्वादिः-834. अक. सेट्. पर. ज्वलादिः ।) '—वैप्लव्ये', विप्लव एव वैप्लव्यम्' इति क्षीरस्वामी । 'वैकल्ये' इति धातुकाव्ये (2-21) ।

टालकः-लिका, टालकः-लिका, टिटलिषकः-षिका, टाटलकः-लिका ; [B]टालः-टलः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचलधातुवत् (510) ज्ञेयानि । घटादिकार्यं तु नास्य भवतीति विशेषः ।

(643) " टिकृ गतौ " (I-भ्वादिः-103. सक. सेट्. आत्म.)

टेककः-किका, टेककः-किका, टिटेकिषकः-टिटिकिषकः-षिका, टेटिककः-किका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रिटधातुवत् (190) ज्ञेयानि । अस्य धातोरात्मनेपदित्वात् टेकमानः, इति शानचि रूपमिति तस्मादस्य विशेषः ।

(644) " टीकृ गतौ " (I-भ्वादिः-104. सक. सेट्. आत्म.)

टीककः-किका, टीककः-किका, टिटीकिषकः-षिका, टेटीककः-किका, [4]टीका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचीभतिवत् (530) ज्ञेयानि ।

(645) " ट्वल वैक्लब्ये " (I-भ्वादिः-835. अक. सेट्. पर.) ज्वलादिः ।

ट्वालकः-लिका, ट्वालकः-लिका, टिट्वलिषकः-षिका, टाट्वलकः-लिका ;

---

1. इदित्करणाण्णिचो विकल्पः । तेन णिजभावपक्षे क्रमेण शुद्धात् सन्नन्तात् यङन्ताच्च रूपाणि ।
2. वीन्=पक्षिणः टङ्कयति=बध्नातीति विटङ्कः=कपोतपालिका । 'कर्मण्यण्' (3-2-1) इत्यण् । 'कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् ।' इत्यमरः ।
3. टङ्कयन्त्यनेनेति टङ्कः=आयुधविशेषः । संज्ञायां घः ।
4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः । टीका=व्याख्या ।

A. 'सौधे विटङ्कजुषि पश्यति धूसितोऽयं राजारिकीटबलचूर्णनयाऽतिपूज्यः ।' धा. का. 3.27.

B. 'ज्वालेन तापेन चला जडाङ्गी टालशोकद्रुलितप्रतापाः ॥' धा. का. 2.21.